# Shri Pratyangira Kavach



Shri Yogeshwaranand Ji
+919917325788, +919675778193
shaktisadhna@yahoo.com
www.anusthanokarehasya.com
www.baglamukhi.info

## श्री प्रत्यंगिरा कवच

देव्युवाचः

भगवन् सर्व धर्मज्ञ सर्वशास्त्रार्थ पारग ।
देव्याः प्रत्यंगिरायाश्च कवचं यत्प्रकाशित।।१।।
भैरव-उवाचः
श्रृणु देवि प्रवक्ष्यामि कवचं परमाद्भुतम् ।।२।।
सर्वार्थ साधनं नाम त्रैलोक्ये चातिदुर्लभम् ।
सर्वसिद्धिमयं देवि सर्वेश्वर्य-प्रदायकम् ।।३।।
पठनाच्छ्रवणान्मर्त्यः त्रैलोक्यैश्वभाग्भवेत्।
सर्वार्थ-साधकस्यास्य कवचस्य ऋषिः शिवः।।४।।
छंदोविराट्परा शक्ति-र्जगद्धात्री च देवता ।
धर्मार्थ-काम-मोक्षेषु विनियोगः प्रकीर्त्तितः।।५।।

### पाठ

प्रणवं मे शिरः पातु वाग्भवं च ललाटकम्।

ह्रीं पातु दक्ष नेत्रं में लक्ष्मीर्वामं सुरेश्वरी।।६।।
प्रत्यंगिरा दक्ष कर्णे वामे कामेश्वरी तथा।
लक्ष्मी प्राणं सदा पातु बंधनं पातु केशवः ।।७।।
गौरी तु रसनां पातु, कंठं पातु महेश्वरः।
स्कंधदेशं रतिः पातु, भुजौ तु मकरध्वजः।।८।।
शंखं निधिकरः पातु वक्षः पद्मनिधिस्तथा।
ब्राह्मी मध्यं सदा पातु, नाभिं पातु महेश्वरी।।९।।
कौमारी पृष्ठदेशं तु, गुह्यं रक्षतु वैष्णवी।
वाराही च कटि पातु, चैंद्री पातु पद द्वयम्।।१०।।
भार्यां रक्षतु चामुण्डा, लक्ष्मी रक्षतु पुत्रकान्।
इंद्रः पूर्वे सदा पातु, आग्नेय्यां-अग्नि देवता।।११।।
याम्ये यमः सदा पातु, नैर्ऋत्यां निर्ऋतिस्तथा।
पश्चिमे वरूणः पातु, वायव्यां वायु देवता।।१२।।
सौम्यां सोमः सदा पातु, चैशान्यामीश्वरो विभुः।
उर्ध्वे प्रजापतिः पातु, ह्यध्श्च-अनंत देवता।।१३।।
राजद्वारे श्मशाने च अरण्ये प्रांतरे तथा।
जले स्थले चांतरिक्षे, शत्रुणां निवहे तथा।।१४।।
एताभिः सहिता देवी, चतुर्बीजा महेश्वरी।
प्रत्यंगिरा महाशक्तिः सर्वत्र मां सदावतु।।१५।।
इति ते कथितं देवि, सारात्सारं परात्परम्।
सर्वार्थ साधनं नाम कवचं परमाद्भुतम्।।१६।।

फलश्रुति

अस्यापि पठनात्सद्यः कुबेरोऽपि धनेश्वरः।
इंद्रद्याः सकला देवाधारणात्पठनाद्यतः ।।१७।।
सर्वसिद्धीश्वराः संतः सर्वेश्वर्यम-वाप्तुयुः।
पुष्पांजल्यष्टकं दत्वा मूलेनैव सकृत्पठेत्।।१८।।

संवत्सराकृतायास्तु पूजायाः फलमाप्नुयात्।
प्रीतिमन्यान्तः कृत्वा कमला निश्चला गृहे।।१६।।
वाणी च निवसेद्वक्त्रे सत्यं सत्यं न संशयः।
यो धारयति पुण्यात्मासर्वार्थ-साधनाभिधम्।।२०।।
कवचं परमं पुण्यं सोऽपि पुण्यवतां वरः।
सर्वैश्वर्ययुतो भूत्वा त्रैलोक्य विजयी भवेत्।।२१।।
पुरूषो दक्षिणे बाहौ नारी वामभुजे तथा।
बहुपुत्रवती भूत्वा धन्यापि लभते सुतम्।।२२।।
ब्रह्मास्त्रादीनि शस्त्राणि नैवकृन्तन्तितत्तनुम्।
एतत्कवचमज्ञात्वा यो जपेत्परमेश्वरीं।।२३।।
दारिद्रयं परमं प्राप्य सोऽचिरान्मृत्युमाप्नुयात्।

..............

..............




Shri Yogeshwaranand Ji

+919917325788, +919410030994

shaktisadhna@yahoo.com

www.anusthanokarehasya.com

www.baglamukhi.info


**My dear readers! Very soon I am going to start a free of Cost E-mail based monthly magazine related to tantras, mantras and yantras including practical uses for human welfare.It will be delivered to you in pdf format to your email id**

which you can read on any device and you can also take its print. I request you to appreciate me, so that I can change my dreams into reality regarding the service of humanity through blessings of our saints and through the grace of Ma Pitambara. Please make registered to yourself and your friends. For registration email me at shaktisadhna@yahoo.com. Thanks

**For Purchasing all the books written By Shri Yogeshwaranand Ji Please Contact 9540674788**

1. Mahavidya Shri Baglamukhi Sadhana Aur Siddhi




**2.** Mantra Sadhana



## 3. **Sri Vidya** Shodashi Mahavidya **(Tripura Sundari Sadhana Shri Yantra Puja)**

